श्रीमन्नारायणरामानुजयतिभ्यो नमः

# जीयर् एड्युकेषनल् ट्रस्ट्, वेदविश्वविद्यालयः

# जीयर् इन्टेग्रेटेड् वेदिक एकेडेमि (जीवा)


श्रीरामनगरम्, मुच्चिन्तल् ग्रामः शंषाबाद मण्डलम् - रङ्गारेड्डी डिस्ट्रिक्ट्

दूरवाणी संख्या - 9346262189, 9666646377, 9247784094, 9553549972


**श्रीमत्परमहंसपरिव्राजकाचार्य श्री.श्री.श्री त्रिदण्डि श्रीमन्नारायणरामानुज चिन्नजीयर् स्वामिपादानां मङ्गलाशासनपुरस्सरं तेषामेवाध्यक्ष्ये वर्तिष्यणाः वार्षिकवेद-आगम-दिव्यप्रबन्धपरीक्षाः-2019**

---

## अभ्यर्थनपत्रम्

चित्रम्

**अभ्यर्थिनो नाम** :

**पितुर्नाम** :

**गुरोर्नाम** :

**ऋषयः (प्रवरः)** :

**गोत्रम्** : **सूत्रम्** :

**अधीतवेदपाठशालाया नाम** :

**जन्मग्रामः** : **जन्मदिनाङ्कः** : / / .

**पत्राचारसङ्केतः** : -----------------------------------------------------------------

-----------------------------------------------------------------

---------------------------------------------------------------

**दूरवाणी संख्या** : **चलवाणी संख्या**

**देयपरीक्षाविषयः** **वेदः** **आगमः** **दिव्यप्रबन्धः**

**परीक्षाविभागः** : ................................**शाखा**.....................................

**वेदान्तरे अथवा विषयान्तरे प्रवेशोऽस्ति वा : अस्ति चेत् कस्मिन् वेदे/विषये**

..........................................................................................................................

**पूर्वप्रदत्तपरीक्षापरिचयः**.........................................................................................
..

......................................................................................................................

**सूचना : अभ्यर्थनापत्रं स्वहस्ताक्षरैर्लिखित्वा प्रेषणीयम्**

**स्थलम्** **दिनाङ्कः**

**गुरुहस्ताक्षरम्** **पितुः /संरक्षकस्य वा हस्ताक्षरम्** **अभ्यर्थिनो हस्ताक्षरम्**

श्रीमन्नारायणरामानुजयतिभ्यो नमः

# जीयर् एड्युकेषनल् ट्रस्ट्, वेदविश्वविद्यालयः

## जीयर् इन्टेग्रेटेड् वेदिक एकेडेमि (जीवा)

श्रीरामनगरम्, मुच्चिन्तल् ग्रामः शंषाबाद मण्डलम् - रङ्गारेड्डी डिस्ट्रिक्ट्
दूरवाणी संख्या - 9346262189, 9666646377, 9247784094, 9553549972

**श्रीमत्परमहंसपरिव्राजकाचार्य श्री.श्री.श्री त्रिदण्डि श्रीमन्नारायणरामानुज चिन्नजीयर् स्वामिपादानां मङ्गलाशासनपुरस्सरं तेषामेवाध्यक्ष्ये वर्तिष्यणाः वार्षिकवेद-आगम-दिव्यप्रबन्धपरीक्षाः-2019**

## वेद-आगम-दिव्यप्रबन्धपरीक्षायाः आह्वानपत्रम्

---

**विदितमेतत्समेषां विदुषां यत् श्रीमत्परमहंसपरिव्राजकाचार्याः उभयवेदान्तप्रवर्तकाचार्याः श्री.श्री.श्री. त्रिदण्डि श्रीमन्नारायणरामानुज चिन्नजीयर् स्वामिपादाः स्वाचार्यावतारमहोत्सवं पुरस्कृत्य प्रतिसंवत्सरं कृतवेदागमप्रबन्धाध्ययनानां छात्राणां परीक्षाः प्रचालयन्तीति ।**

**श्रीमत्परमहंसपरिव्राजकाचार्यैः सत्यसङ्कल्पैः श्री.श्री.श्री पेद्दजीयर्स्वामिपादैः वेदपरिरक्षणार्थं कृतो महान् प्रयासः वाचामगोचरः । 1974 आरभ्य 1979 पर्यन्तं 108 स्वाध्यायज्ञानयज्ञाः एवं चतर्वेदपारायणपूर्वकयज्ञाश्च तैरायोजिताः । समग्रे भारते देशे विद्यमानाः 2500 पञ्चशताधिकद्विसहस्रसंख्याकानां विदुषां समवायेन हस्तिनापुरमहानगरे (डिल्ली) रामलीलामैदानक्षेत्रे वैश्विकस्तरे 1973 तमे संवत्सरे अन्ता राष्ट्रीय वैदिकसम्मेलनं समायोज्य प्रतिग्रामं वेदमहिमानं सामान्यजनमानसे अपि प्रसार्य वैदिकश्रद्धां अभ्यवर्धयन् । तदतिरिच्य वेदविद्याप्रचाराय 1976-तमे वर्षे वेदवेदाङ्गविद्यालयानुद्घाट्य भारतस्तरे वेदविद्यारक्षणमकुर्वन् । ते वेदविद्यालयाः इदानीं चिन्नजीयर्स्वामिपादानामाध्यक्ष्ये सर्ववेदशाखाध्यापनद्वारा उत्तमरीत्या प्रचाल्यन्ते । ते च वैदिकविश्वविद्यालयमिव शोभामावहन्तो राराजन्ते । प्रकृते तु वेदानतिरिच्य पाञ्चरात्रागमदिव्यप्रबन्ध-शास्त्रग्रन्थाध्ययनादिभिः सर्वतोमुखं विकासं प्राप्नुवन्तो विराजन्ते ।**

**विहितवेदशास्त्रादिविद्यानां विदुषां सम्माननं स्वीयकर्तव्यतया भावयन्तः श्री.श्री.स्वामिपादाः निजावतारमहोत्सवसन्दर्भे जीयर् अवार्डनामकपुरस्कारद्वारा तान् सम्मानयन्ति । नैतावता विरमन्तो वेदविद्याप्रचारप्रसारमभिकांक्षन्तः वेदसभां निर्वहन्तः योग्यान् वेदविदुषः सत्कुर्वन्तः विराजन्त इति वैदिकविदुषां नाविदितम् । इत्थं बहुधा वेदविद्यापोषणं कलयन्तो श्री.श्री.श्री स्वामिपादाः स्वाचार्याणां श्री.श्री.श्री. पेद्दजीयर्स्वामिपादानां अवतारदिनं पुरस्कृत्य प्रतिसंवत्सरं अधीतवेदानां विद्यार्थिनां परीक्षाः प्रचाल्य तेषां विभिन्नस्तरे उत्तीर्णतामनुलक्ष्य तेभ्यः प्रमाणपत्रसम्भावनादिकं च अनुगृह्णन्ति । आसु परीक्षासु निष्णातान् सुयोग्यवेदविदुषः परीक्षकत्वेनायोज्य उन्नतस्तरे परीक्षां प्रचालयन्तो राराजन्ते । इमं सदवकाशं समुपयुज्य समुत्सुकाः वैदिकविद्यार्थिनः स्वकीयाभ्यर्थनापत्रं समये संप्रेष्य परीक्षायां भागमूह्य प्रगतिं प्राप्नुन्तु वेदपुरुषस्यानुग्रहपात्रतामपि वहन्तु इति संप्रार्थयामहे।**

# स्वस्व विषये परीक्षांशाः

ऋग्वेदः मूलान्तभागः, क्रमान्तः, घनान्तः।

यजुर्वेदः मूलान्तभागः, क्रमान्तः, घनान्तः।

सामवेदः मूलान्तभागः, रहस्यान्तः।

अथर्ववेदः मूलान्तभागः, (ब्राह्मणोपनिषदन्तर्भाव्य)

श्रीपाञ्चरात्रागमः आराधनम्, उत्सवाः, प्रतिष्ठान्तभागः।

दिव्यप्रबन्धः नालायिरं, तिरुवाय्मॊजि।

## विविधशाखानां परीक्षासञ्चालन समयसारिणी

29-07-2019 (सोमवासरः) ऋग्वेदः, शुक्लयजुर्वेद काण्वशाखा, माध्यन्दिनशाखा, यजुर्वेदः मैत्रायणीशाखा

30-07-2019 (मंगळवासरः) कृष्णयजुर्वेदः, श्रीपाञ्चरात्रागमः

31-07-2019 (बुधवासरः) सामवेदः (कौथुमशाखा), अथर्ववेदः (शौनक शाखा), दिव्य प्रबंधश्च ।

परीक्षा समयः : प्रातः 8-30 आरभ्य 12.30 पर्यन्तः समयः

मध्याह्ने 2-30 आरभ्य 5-30 पर्यन्तः समयः

**परीक्षास्थलम् :** जीयर् इंटिग्रेटड् वेदिक् अकाडमि (जीवा), दिव्य साकेत प्रांगणं, वेद विश्व विद्यालयम्, श्रीरामनगरम् , मुच्चिंतल् ग्रामः, शंषाबाद् मंडलम्, रंगारॆड्डि जिल्ला

**दूरवाणी संख्या :** 93462 62189, 9, 96666 46377, 92477 84094, 9553549972

**परीक्षार्थिनां सूचना :**

1। परीक्षार्थिनः यथासमयं समुपेत्य निर्वाहकानां साहृयमाचरन्तु ।

2। परीक्षार्थिनः वैदिकोचितवेषभूषारहिताः परीक्ष्यार्हतां परित्यजेयुः ।

3। परीक्ष्यार्थिनां सामान्यावासभोजनादिकं परिकल्प्येत ।

4। परीक्षार्थिनां गत्यागतिव्ययः स्वयं वहनीयः ।

5। परीक्षार्थिनः अभ्यर्थनापत्रं अन्तर्जालतः स्वीकृत्य प्रतिकृतीकृत्य यावदपेक्षितं उपयोक्तुं शक्नुवन्ति ।

6। सर्वैः परीक्षार्थिभिः अभ्यर्थनापत्रेण साकं स्वकीयचित्रद्वयं, जन्मदिनप्रमाणपत्रं, पूर्वप्रदत्तपरीक्षायोग्यतापत्रादीनां प्रतिकृतयः सम्मिल्य संप्रेषणीयं, परीक्षासमये च मूलप्रमाणपत्रादिकं आनेयम्।

7। अन्तिमनिर्णयः परीक्षकाणामेव ।

8। अभ्यर्थनापत्रस्य पाप्तये अन्तिमदिवसः 21-07-2019

## परीक्षायामुत्तीर्णानां विद्यार्थिनां सम्भावनाक्रमनियमः -

वेदविभागः -

1. घनान्तः प्रथमश्रेणी - रु 4500 द्वितीयश्रेणी - 4000
2. क्रमान्तः प्रथमश्रेणी - रु 3500 द्वितीयश्रेणी - 3000
3. मूलान्तः प्रथमश्रेणी - रु 2500 द्वितीयश्रेणी - 2000

पाञ्चरात्रागमः

1. आराधनान्तः प्रथमश्रेणी - रु 1500 द्वितीयश्रेणी - 1000
2. उत्सवान्तः प्रथमश्रेणी - रु 2500 द्वितीयश्रेणी - 2000
3. प्रतिष्ठान्तः प्रथमश्रेणी - रु 3500 द्वितीयश्रेणी - 3000

दिव्यप्रबन्धः

1. नालायिरम् प्रथमश्रेणी - रु 3500 द्वितीयश्रेणी - 3000
2. तिरुवाय्मोजि प्रथमश्रेणी - रु 1500 द्वितीयश्रेणी - 1000

31-07-2019 (बुधवासरे) *उत्तीर्णानां विद्यार्थिनां प्रमाणपत्रसम्भावनासत्कारादयः साक्षात्*

*श्री.श्री.श्री चिन्नजीयस्वामिनां वरदहस्तेन समर्प्येरन्।*